**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# प्रतिमानाटकस्थप्रमुखाणां पात्राणां चरित्रवैशिष्ट्यम्

**भोजराजभट्टः**

*अध्यापकः, योगिनरहरिनाथ-संस्कृत-गुरुकुलम्*

bbhatta054@gmail.com

https://orcid.org/0009-0002-7966-8283

https://doi.org/10.3126/srj.v1i2.99131

**शोधसारः**

*प्रतिमानाटकस्थपात्राणां चरित्रचित्रणायैवालेखो व्यापृतो दृश्यते। प्रतिमानाटकं खलु महाकविभासेन विरचितं सुन्दरं प्राचीनं नाटकं वर्तते। अत्र प्रकृतेः सुन्दरता, अनुकरणीयचरित्रचित्रणं, मानवता, वीरत्वं, भ्रातृप्रेम, कर्तव्यपालनत्वञ्चास्मिन्नाटके प्रामुख्येन दर्शितं वर्तते। आलेखसम्पादनाय पुस्तकालयीयमाध्यमेन सामग्रीं सङ्कलय्य तुलनात्मकविश्लेषणविधी मुख्यरूपेणाङ्गीकृतौ स्तः। महाकवेर्भासस्य प्रतिमानाटके प्रमुखाणां पात्राणां चरित्रचित्रणं वाल्मीकीयरामायणकथातोऽपि सुन्दरं, मनोहरं कमनीयञ्चास्ति। प्रमुखाणां पात्राणां मध्ये रामस्यादर्शपुरुषरूपेण, सीतायाश्च मृदुहृदयत्वेन कर्तव्यपरायणत्वेन च चित्रणं विहितम्। लक्ष्मणश्च भ्रातृभक्तः, कैकेयी ऋषिशापवशाद्दुष्टा परन्तु स्वभावत प्रेमयुक्तास्तीति ज्ञायते। नाटकस्य प्रमुखपात्राणां यथोचितचरित्रसम्मेलनेन नाटकं पठनीयं जातमस्तीति चरित्रचित्रणे भासस्य महती सफलतेति निष्कर्षः। अत एव प्रतिमानाटके पात्राणां रामायणकथातोऽन्यद्रूपेण चित्रितमिति प्रस्तुतं विद्यते। एत एव विषया अस्मिन्नालेखे प्रामुख्येण दर्शिता विद्यन्ते।*

**शब्दकुञ्जी** - प्रतिमा, मर्यादा, पतिव्रता, आर्यपुत्रः, भ्रातृप्रेम।

## विषयपरिचयः

संस्कृतभाषा च देववाणी अस्ति। संस्कृतभाषा च देवैरपि सेवनीया पवित्रा भाषा वर्तते। सम्-उपसर्गपूर्वक-कृधातोः क्तप्रत्यये सति संस्कृतशब्दस्य व्युत्पत्तिर्भवति। अस्यार्थश्च संस्कारयुक्ता भाषा। *संपरिभ्यां करोतौ भूषणे* इति पाणिनिसूत्रनिर्देशनेन भूषणेर्थे सुडागमे सति संस्कृतशब्दो निष्पद्यते। अशुद्धापभ्रंशरहिता भाषा संस्कृतभाषा इयमेव देवभाषा, देववाणी, गीर्वाणवाणी इत्यादिभिर्नामभिः प्रथितास्ति। अत एव *संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः। सहितयोर्भावः साहित्यम्* अर्थात् शब्दार्थयोः सहभाव इति स्पष्टीभवति। संस्कृतसाहित्यस्य द्विविधं स्वरूपमस्ति। वैदिकं लौकिकञ्च। वेदभाषा एवं लोकभाषा इत्यपि ज्ञायते। लौकिकसाहित्यस्यापि पश्चाद्विभाजनं कृत्वा नाटककाव्याख्यानप्रबन्धाः प्रथिताः। अतो लौकिकसंस्कृतवाङ्मयस्य एको भेदो नाटकञ्चवेदैर्निर्मितं वैदिकवाङ्मयात्क्रमशो लौकिकसंस्कृतवाङ्मये विविधतत्त्वसम्मिश्रणेन विकसितं समृद्धञ्च जातम्। तद्रचनायां ख्यातिप्राप्तैः कविभिर्महदवदानं दत्तम्। सर्वप्रथमं भरतमुनिः नाट्यशास्त्रनामकं नाटकलक्षणग्रन्थं रचयामास। तेनाप्सरोभिः ब्रह्मण आदेशान्नाटकं रचयित्वा भूतले नाटकस्य विकासस्यादिमः प्रारम्भो विहितः। पूर्वं तु नाटकं खलु

संवादयोग्यमात्रमासीत् पश्चाद्विकसितो भूत्वा नियमैस्तत्त्वैश्च संवलितं सदधुनापर्यन्तं सर्वाङ्गविकसितं जातम्। अत एव नाटकं महत्त्वाधायकं रचनमस्ति। नाटकरचनासन्दर्भे साङ्गोपाङ्गतत्त्वाङ्कादिभिः सहितानां नाटकानां रचयिता महाकविर्भासः कविकुलगुरुकालिदासादपि प्राचीनः सर्वप्रथमः नाट्यकारोऽस्ति। एतस्य नाटकरचनकौशलमर्वाचीनैः कविभिरपि प्रभूतमीडितम्। तत्र प्रतिमानाटकमपि अमूल्यं ग्रन्थरत्नमवलोक्यते। अत एव एतस्यैव नाटकस्याधारेण अस्मिन् वर्णितानां प्रमुखाणां पात्राणां चरित्रचित्रणमत्र प्रस्तूयते। प्रमुखाणां पात्राणां चरित्रचित्रणसन्दर्भे पूर्ववर्तिभिराचार्यैरपि बहु निगदिमस्ति। परन्तु तत्र नाटकस्य व्याख्यानसन्दर्भ एव प्रायो विश्लषितं वर्तते। तत्र विशिष्टरूपेण प्रमुखपात्राणां चरित्रचित्रणविषये नैयून्यमनुभूयते। अत एव वाल्मीकीयरामाणायस्थपात्राणां नाटकस्थपात्राणां च तुलनां कृत्वा चरित्रचित्रणं विहितमित्यध्ययनस्य नवीनता सार्थकता च सिध्यति। इदमेवास्याध्ययनस्यान्तरालं विद्यते।

प्रतिमानाटके प्रस्तुतानां प्रमुखाणां पात्राणां चरित्रचित्रणमेवास्य प्रमुखा समस्या अस्ति। अत एव एतदेवास्य समस्यारूपेण विद्यते। शोधसमस्यायांलिखितायाः समस्यायाः समाधानमेवप्रस्तुतशोधकार्यस्यमुख्यमुद्देश्यमस्ति। अत एव प्रतिमानाटकस्य प्रमुखाणां पात्राणां चरित्रचित्रणमेवास्योद्देश्यमस्ति।

## अध्ययनविधिः

प्रस्तुतशोधकार्यसम्पादनाय पुस्तकालयविधिना प्रतिमानाटकग्रन्थस्य प्राथमिकसामग्रीरूपेण तथा वाल्मीकीयरामायणमूलग्रन्थव्याख्यानग्रन्थटीकादीनां द्वैतीयिकसामग्रीरूपेण सङ्कलनं कृतं विद्यते, तथा चान्ये व्याख्यानग्रन्थाश्च सहायकसामग्रीरूपेण प्रयुक्ता विद्यन्ते।

तथा च सङ्कलिसामग्रीणां विश्लेषणाय च विश्लेषणात्मक-तुलनात्मकविधी अङ्गीकृतौ स्तः। प्रतिमानाटकस्थानां प्रमुखाणां पात्राणां वाल्मीकीयरामायणदृष्ट्या तथा नाटकदृशा च तुलनात्मकं विश्लेषणं विधाय निष्कर्षः स्थापितो वर्तते। सामग्रीणां सन्दर्भप्रदाने मूलग्रन्थानां परम्परितशैल्या, आधुनिकग्रन्थानाञ्च एपिएपद्धत्या कार्यं कृतं वर्तते।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

प्रतिमानाटकस्य प्रमुखाणि पात्राणि एवास्य क्षेत्रमस्ति। अत एव तत्पात्रसम्बद्धाः वाल्मीकीयरामायणादिग्रन्थास्तथा तत्पात्रविषया अस्य क्षेत्रमस्ति। नाटकस्य पात्रविषया आलेखा अस्य क्षेत्ररूपेण सन्ति चेदतिरिक्ता सर्वे विषया अस्य सीमारूपेण सन्ति।

## चरित्रचित्रणम्

पात्राणां चरित्रचित्रणं कथावस्तुनि विशेषरूपेण सहायकं भवति। नाटके पात्राणां चरित्रचित्रणमत्यन्तमावश्यकम्। पात्राणां संवादस्य माध्यमेन वा सूत्रधारस्य वचनैश्च पात्राणां चरित्रं चित्रितं भवति। कुत्रचित् पात्राणां मानसिकी अवस्था, तेषां कार्यव्यापारः, चेष्टा, संवादः इत्यादिभिः खलसज्जनानां

पात्राणामुपस्थितिर्भवति। यः कोऽपि नाटककारः स्वस्य नाटके चरित्रचित्रणेन स्वस्य विचारस्य तथा सिद्धान्तानां प्रतिपादनं करोति। पात्राणि विभिन्नासु परिस्थितिषु संस्थाप्य जीवनस्य संघर्षं प्रदर्शयति। पात्रनियोजनं नाट्यकाराणां विशेषमहत्त्वाधायकमस्ति। अस्य प्रधानं कारणमिदमस्ति यत् पात्राणि स्वस्य मनोवृत्तीनां संस्काराणां वातावरणस्य तथा विभिन्नप्रकारस्य संपर्कस्य कारणेन यच्चरित्रं प्रदर्शयन्ति, तच्चरित्रमेव नाटकस्य मूलाधारो भवति, तथा तन्माध्यमेन नाट्यकारः स्वस्य सन्देशं प्रसारयति। यो नाट्यकारः पात्राणां चरित्रस्याधिकं स्पष्टरूपेण चित्रयति, तावत्स तन्मात्रं सफलो भवति। एतद्दृष्ट्या भासः सफलः सिद्धो भवति। चरित्रस्यार्थः केवलं सद्गुण एव नहि, अपितु गुणदोषात्मकं समस्तं व्यक्तित्वमस्ति। मानवस्य सुन्दरासुन्दरयोः प्रवृत्त्योर्यथार्थं चित्रणं चरित्रान्तर्गतमागच्छति। महाकवेर्भासस्य नाट्यकलाया अपूर्वस्यां सफलतायां पात्राणां चरित्रचित्रणस्य महत्त्वपूर्णं स्थानमस्ति। भासेन सर्वेषां पात्राणां चरित्रचित्रणं सुन्दरतया कलाकौशलेन कृतमस्ति। अस्य नाटकेषु यानि पात्राणि प्राप्यन्ते तानि संस्कृतसाहित्ये कुत्रापि प्राप्तुं न शक्यन्ते। उच्चचरित्रस्य धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरप्रशान्तः इत्यादीनि पात्राणि तथा खलः, दैवी, आसुरी इत्यादीनि यादृशानि पात्राणि सम्भावयितुं शक्यन्ते तानि सर्वाणि भासस्य नाटकेषु उपलब्धानि सन्ति। अतोऽस्य नाटकेषु अनेकप्रकाराणां पात्राणां सफलं समावेशोऽस्ति।

भासस्य पात्राणां बहुलतया प्रशंसां कुर्वन्नाचार्यो बाणभट्टो भासमाद्रियते। यथा-

*सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः।*
*सपताकैर्यशो लेभे भासो देवकुलैरिव* (हर्षचरित १/१५)।।

भासस्य नाटकस्य विशेषता इयमस्ति यत् अनेकपात्राणां सत्त्वेऽपि एकमपि पात्रमनावश्यकं न प्रतीयते। भासस्य पात्राणां वर्गीकरणमन्यनाटककारेभ्य पृथगस्ति। कालिदासस्य पात्रमिव काल्पनिकं शृङ्गारिकञ्च वस्तु न वर्णयति। तथा भवभूति इव भावुकपात्रचयनं न करोति, भट्टनारायणस्य पात्राणि इव बलशालीनि तथा शूद्रकस्य पात्राणि इव हास्ययुक्तानि न सन्ति (शास्त्री, २००९, पृ. १३६)। अत्र महाकवेर्भासस्य प्रतिमानाटकस्य प्रमुखाणां पात्राणां चरित्रस्य चित्रणं विधाय तस्य कलायाः प्रतिभायाश्च संक्षेपेण प्रकाशः क्रियते। तत्र नाटकस्य मुख्यपात्रस्य रामस्य चरित्रचित्रणमादौ क्रियते।

**रामचारित्र्यम्**

रामश्च प्रतिमानाटकस्य धीरोदात्तो नायकोऽस्ति। रामश्च भगवान्नस्ति मर्यादापुरूषोत्तमश्च सः। यं प्रति प्राच्या जना नतमस्तकाः प्राचीनकालादेव सन्ति। एतस्मात्कारणादेव अधिकेषु ग्रन्थेषु तस्यैव महच्चरित्रस्य नायकस्य दिव्यगुणानां बृहद्विवेचनं क्रियते। रामश्च सनातनधर्मानुसारं भगवतो विष्णोरवतारः। सर्वाधिकगुणयुक्तश्च। यथा-

*अहो बलमहो वीर्यमहो सत्त्वमहो जवः।*
*राम इत्यक्षरैरल्पैः स्थाने व्याप्तमिदं जगत् (प्रतिमानाटक ५/१४)।।*

विश्रुतकीर्तियुक्तं रामं भासेनापि नाटकस्य पात्रत्वेन निश्चित्य प्रतिमानाटकं विरचितमस्ति। अस्य पात्रस्य परवर्तिभिः कविभिरुपजीव्यत्वेन प्रयोगः कृतः। एतस्यैव रामस्य चरित्रदर्शनेन नाट्यशास्त्रादिनि लक्षणग्रन्थे नायकस्य परिभाषा कृता। साहित्यदर्पणकारो विश्वनाथः परिभाषयति। यथा-

*त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।*

*दक्षोऽनुरक्तलोकस्तेजोवैदग्धशीलवान्नेता ।।*
*शोभा विलासो माधुर्यं गाम्भीर्यं धैयतेजसी ।*
*ललितोदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः(साहित्यदर्पण३/३०-३१) ।।*

आचार्यो धनञ्जयस्य कथनमप्युल्लेखनीयं वर्तते। यथा-

*नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।*
*रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ।।*
*बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।*
*शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः (दशकुमार २/१-२) ।।*

उपर्युक्तानि सर्वाणि लक्षणानि प्रतिमानाटकस्य नायके रामे स्पष्टरूपेण दृष्टीगोचराणि भवन्ति। नायकश्चतुर्धा भवति। धीरललितः, धीरप्रशान्तः, धीरोद्धतः, धीरोदात्तश्च। दक्षिण-शठ-धृष्टादिषु प्रतिमानाटकस्य रामो दक्षिणकोट्यामागच्छति।

रामः सात्त्विकादिसद्गुणैः सम्पन्नो दिव्यनायकोऽस्ति। स्नेहयुक्तः पतिरूपेण रामश्चित्रितः। रामस्य सीतया सह वार्तालापः प्रेम्णा मधुरतया चौतप्रोतमस्ति। सीताया वल्कलधारणे सति रामस्यापि रूचिस्तत्र गच्छति। यथा-

*मा स्वयं मन्युमुत्पाद्य परिहासे विशेषतः ।*
*शरीरार्धेन मे पूर्वमाबद्धा हि यदा त्वया (प्रतिमानाटक १/१०) ।।*

सीताया वल्कलधारणानन्तरं राम आदर्शे वल्कलानि दृष्ट्वाभूषणस्य परिधानाय सीतां प्रेरयति, वनगमनाय सीतामाज्ञां दातुं न वाञ्छति। वने महत्कष्टं भवति, प्रकृत्यानुकुलं वातावरणं न भवतीति कारणात् रामः सीतां वने नेतुं न वाञ्छति। परन्तु सीताया आग्रहं वारयितुं न शक्नोति। सीताया पातिव्रत्यधर्मरूपेण वनवासाय रामोऽपि आज्ञां ददाति। एतस्मात्कारणाद्रामस्य हृदयस्य विशालतात्र प्रकटीभवति। भासेन रामस्यैकपत्नीव्रतधारकत्वेन चित्रणं विहितम्। पत्नीं सीतां प्रति तस्य मनसि अपारनिष्ठा वर्तते।

प्रतिमानाटके रामो महत्त्वाकाङ्क्षी नास्ति। राज्ञो दशरथस्य राज्यप्रदानेऽपि तत्रोत्सुको नास्ति। तत्र स्वस्यासहमतिं प्रकटयति। केकेय्याः कारणेन यदा वनगमनं प्राप्नोति तत्र स प्रसन्नचित्तः सन् हर्षं प्रकटयति। सर्वासां प्रजानां भ्रातॄणां पितुश्च सुखप्रदाने दत्तचित्तोऽस्ति। राज्यस्य सुखशान्त्योः कामनां करोति। स्वस्य राज्याभिषेकावरुद्धे प्रसन्नः सन् विपत्तावपि अशुभेऽपि शुभफलमेव पश्यति। राज्याभिषेकावरुद्धे राज्ञो दशरथस्य वनगमननिवृत्तिः, स्वस्य बालभावत्वं, प्रजानां नवनृपतिचिन्तारहितत्वं, स्वस्य च भ्रातृतुल्यत्वमिति अनेकानि शुभफलानि रामेण दृष्टानि। यथा- *वनगमननिवृत्तिः०(प्रतिमानाटक १/१४) ।।*

रामस्य राज्याभिषेकेऽवरुद्धे लक्ष्मणः क्रुद्धो भूत्वा कैकेय्यैऽप्रियवचनं वदति तदा रामो न तुष्यति, श्लक्ष्णवाचया लक्ष्मणं शान्तयति। भरते राज्ञि जाते रामस्य मनसि अत्यन्तं हर्षो भवति, भरतस्य रक्षा कर्तव्या इति लक्ष्मणं वक्ति। यथा- *भरतो वा भवेद्० (प्रतिमानाटक १/२०), ताते धनुर्नमयि०(प्रतिमानाटक १/२२)* इत्यादिभिः।

उपर्युक्तकथनेन स्पष्टं भवति यत् रामस्य राज्यलिप्सा नास्ति, स्वजनानां प्रजानाञ्च कृते मनसि सदा शुभभावना एव वर्तते। कर्तव्यपालने पितृवचनपालने च स चतुर्दशवर्षपर्यन्तं वने वसति। भरतेन राज्ये समर्पितेऽपि तत्र तस्य स्पृहा न भवति। कैकेय्यादिविमातुरपि स्वस्य मातृवत् सेवां करोति, कौशल्यां प्रति यथाचरति तद्वत् अन्याभ्यो मातृभ्योऽपि सम्मानं करोति। वनवासस्याज्ञां प्राप्यापि कैकेय्यै न क्रुध्यति। भातॄणां कृतेऽपि रामस्य हृदयेऽपारः स्नेहोऽस्ति।

लक्ष्मणन्तु सदानुजं स्वीकरोत्येव। स्वस्यानुगामिनं लक्ष्मणं प्रति तस्य मनसि स्नेहो वर्तते। तथा भरतस्योपर्यपि तादृश एव स्नेहोऽस्ति। वने भरतो रामेण सह मेलितुमागच्छति। तस्मिन् क्रमे रामः सीतायै भरतस्य स्वागताय हर्षाश्रुं प्रकटयन्ती प्रेषयति। यथा-*इयं स्वयं गच्छतु०(प्रतिमानाटक ४/१३*) इति। अत्र तनयस्य भावोऽपि उद्गारितोऽस्ति। सीतारामौ तनयमेव भरतं मन्वात इति पुष्टिमेति। तथैव भरतो वनवासिनं रामं वनात्प्रत्यावर्तयितुं गच्छति, राज्यग्रहणाय अनुरुध्यति परन्तु रामः पित्राज्ञापालनाय न निवर्तते। स भरताय एव चतुर्दशवर्षपर्यन्तं राज्यसञ्चालनाय निर्देशनं करोति। भरतश्च रामस्य चरणपादुके गृहीत्वा राज्यसिंहासने संस्थाप्य राज्यसञ्चालनस्य कार्यं करोति। नाममात्रस्य राजा एव भवति, भरतस्य चरित्रं दृष्ट्वा रामः प्रसन्नो भूत्वा भरतस्य स्वल्पसमयेनैव महद्यशःप्राप्तिं प्रति प्रशंसति। यथा-*सुचिरेणापि० (प्रतिमानाटक ४/२६* इति।

रामस्य उपर्युक्तेन विनम्रतापूर्णेन वचनेन रामस्य चरित्रस्योज्वलता प्रकाशते। एवम्प्रकारेण आदिनाटककारेण भासेन स्वस्य प्रतिमानाटके नायकस्य रामस्य चरित्रे उदारता, त्यागः, सहिष्णुता, मधुरता, उदात्तता, सहृदयता, प्रेम, धैर्यम्, कोमलता तथा वीरता इत्यादीनां सम्पूर्णानां गुणानां पूर्णः समावेशः कृतोऽस्ति।

रामोऽवतारी पुरुषोऽस्ति। अतो मर्यादायाः सबलं स्थापकस्तथा पोषकः प्रतीयते। अतो मर्यादापुरुषोत्तमः कथ्यते। प्रजायाः पालने राज्यस्य विषये च रामस्य कर्तव्यभाव उदात्तोऽस्ति। जनकल्याणस्य तस्य तादृशमेव ध्यानमस्ति, भरताय राज्यं सञ्चालयितुमयोध्यां प्रति निवर्तितुं प्रेरयति। एका रात्रिरपि भरताय वने स्थातुं न ददाति, राज्ञ अभावे प्रजानां कष्टं भवतीति तस्य विचारः। राज्यस्योपेक्षा क्षणमात्रमपि तस्य सह्यं न भवति। तत्र रामो भरतं प्रति कथयति- "वत्स कैकेयीमातः राज्यं नाम मुहूर्तमपि नोपेक्षणीयम्, तस्मादद्यैव प्रतिनिवर्ततां कुमारः"(भासः, सन् १९६०, पृ. १३७) तच्छ्रुत्वा भरतोऽद्यैव प्रतिनिवर्तत इति सीता पृच्छति। रामश्च राज्यस्य रक्षायै अद्यैव निवर्तनीयमिति कथयति।

तथैवापरप्रसङ्गे रावणः काञ्चनमृगस्य प्राप्तौ अत्यन्तं कठिनं कार्यं वदति। तत्र रामः काञ्चनमृगप्राप्तये तपः बलञ्च साधनद्वयं मया सहास्तीति कथयति। यथा-

*उभयस्यास्ति सान्निध्यं यद्येतत् साधयिष्यति।*

*धनुर्वा तपसि श्रान्ते, श्रान्ते धनुषि वा तपः (प्रतिमानाटक ५/९)।।*

रामस्य वीरतापूर्णस्य वचनस्य श्रवणाद्रावणः पुनः कथयति। यथा- कौशल्यामातः अलमतिमनोरथेन, न ते मानुषेर्दृश्यन्ते (प्रतिमानाटक ५/११)। तत्र रामः स्वस्य पराक्रमस्य परिचयं ददत् कथयति- *सौवर्णान् वा मृगांस्तान्०(प्रतिमानाटक ५/१२) इति।।*

रामस्य तादृशं वीरतापूर्णं पराक्रमं प्रशंसन् रावणः कथयति-*अहो बलमहो०(प्रतिमानाटक ५/१४)।।*

उपर्युक्तकथनेन रामे बलं शौर्यं तथा अन्ये गुणाश्च अतिशयेन सन्तीति प्रतीयते। रामः स्वस्य राज्याभिषेकानन्तरं स्वस्य न्यायशीलता, धार्मिकता, सत्त्यतत्परता इत्यादिगुणानां घोषणां कुर्वन्स्वर्गवासिनं दशरथं प्रति सम्बोध्य कथयति। यथा-*स्वर्गेऽपि तुष्टिमुपगच्छ०(प्रतिमानाटक ७/११)।।*

एवम्प्रकारेण प्रतिमानाटकस्य रामो वाल्मीकीयरामायणस्य रामस्यापेक्षया विशेषो महान् प्रतीयते। प्रतिमानाटकस्य रामे मृदुता, सुकोमलता, मनस्विता, सर्वजनकल्याणपरता इत्यादीनां भावानां प्रदर्शनं कृतमस्ति। रामायणस्य रामः स्वपितरि दशरथे तादृशी कोमला भावना न प्रकटयति यथा प्रतिमानाटकस्य रामः स्पष्टरूपेण प्रकटयति। प्रतिमानाटकस्य रामो स्वस्य वनवासस्य गमनप्रसङ्गे प्रसन्नो भूत्वा वनगमनस्य शुभफलं प्रकटयति। यथा-*वनगमननिवृत्तिः०(प्रतिमानाटक १/१४)।।*

रामायणस्य रामस्य वाल्मीकीयरामायणे अस्मिन्नवसरे अपरमेव वाक्यमस्ति। तस्मिन् वाक्ये दशरथस्य स्त्रीलोलुपतां कामक्रोधपशतां तथा नृशंसता च वर्णिता दृश्यते। यथा- *मूलश्च राजा०(वाल्मीकिरामायण २/२१/५९)।।*

एवम्प्रकारेणान्यत्र दशरथस्य विलापप्रसङ्गेऽपि तादृशः कोमलभावो नाभिव्यक्तः। तथैव रामायणस्य रामस्य कैकेयीं प्रति ईषत्क्रोधप्रकटनं दृश्यते, यथा- *कच्चित्ते परुषं०(वाल्मीकिरामायण २/१८/१७)।।*

परन्तु प्रतिमानाटकस्य रामः कैकेयीं प्रति क्षोभरहितः प्रदर्शितः। यथा- *यस्याः शक्रसमो०(प्रतिमानाटक १/१३)।।*

आदिकविना वाल्मीकिना रामस्य काञ्चनमृगं प्रति धावनं सीताया स्पृहाविनोदनार्थं प्रस्तुतम्। यथा- *आर्यापुत्राभिरामोऽसौ० (वाल्मीकिरामायण३/४३/९)।।*

परन्तु भासेन प्रतिमानाटके पितृभक्तरूपेण रामश्चित्रितः। तत्र श्राद्धेन पितृतर्पणार्थं मृगं प्रति धावनं वर्णितम्। यथा- *तैस्तर्पिताः०(प्रति.ना. ५/१०)*। रामः सीतां प्रति कथयति- *आगच्छ पुत्रकृतकान्०(प्रतिमानाटक ५/११)।।*

इत्थं रामस्योदात्तचरित्रस्य वर्णनं प्रतिमानाटकस्यानेकस्थलेषु कृतमस्ति। स्वस्योत्कृष्टचरित्रस्य परिचयं ददद्रामो भरतं कथयति। यथा-

*पितुर्नियोगादहमागतो०(प्रतिमानाटक ४/२०)।।* रामस्य नाममात्रेणैव जगतः कल्याणं भवति। तदेवाभिप्रायं भरतः प्रकटयति-*नाम्नैव भवतो राज्यं कृतरक्षं भविष्यति(प्रतिमानाटक ४/१९)।।*

प्रतिमानाटकस्य राम आदर्शो महापुरुषोऽस्ति। सोऽनुकरणीयः पुत्रः, भ्राता एवं राजाऽस्ति। अतः सर्वगुणसम्पन्नः प्रधानचरित्रो रामः सर्वोत्कृष्टरूपेण नाटके चित्रितोऽस्ति। प्रजानां कल्याणाय सदा तत्परः, विभिन्नास्ववस्थासु दृढमतिः प्रसन्नमुखः पुत्रत्वभ्रातृत्वपतित्वादिधर्मस्य समुचितरूपेण धारको रामोऽस्य नाटकस्य सफलः मृदुस्वभावः धीरोदात्तो नायकोऽस्तीति स्पष्टीभवति।

**सीताया गुणचित्रणम्**

सीतायाश्चरित्रचित्रणे भासो विशेषरूपेण सफलो जातः। तेन सीतायै आदर्शनारीत्वेन स्वनाटके स्थानं प्रदत्तम्। सीतायां सरलता, सौम्यता, विनयः, पातिव्रत्यं, सहृदयता, उदारचरित्रता, कष्टसहिष्णुता, गुरुभक्तिः, आतिथ्यता, धीरता इत्यादीनां दाक्षिण्यादिगुणानां स्पष्टतया स्थितिर्दृश्यते। अस्मिन्नाटके नायकस्य रामस्य पत्नीरूपेण नायिका सीता चित्रितास्ति। महाराजस्य मिथिलानरेशस्य जनकस्य सुपुत्रीरूपेण सुशीलता सर्वोपरि व्याप्तास्ति। कस्मै जनाय प्रति सा न क्रुध्यति। स्वपते रामस्य राज्याभिषेकेऽवरुद्धेऽपि सीता खिन्ना न भवति। यतो हि महाराजो दशरथ एव महाराजः, रामस्तु राजकुमार एव, एतदेव सीतायै अभीष्टमस्ति। तदेव वदति। यथा-

"प्रियं मे महाराज एवं महाराजः, आर्यपुत्र एवार्यपुत्रः"(भासः, सन् १९६०, पृ. ४९)।

रामश्च स्वस्य वनवासेऽपि सीतायै राजभवन एव निवासाय प्रेरयति। श्वश्रूश्वशुरादीनां सेवायै प्रेरयति। परन्तु पतिर्हि देवो नारीणाम् इत्यादिवचनानुगामिनी पतिव्रता सीता रामस्य निषेधेऽपि वने सहचरति। पतिव्रतानां नारीणां भर्त्रनुसरणं कर्तव्यं, पतौ कष्टं गते पत्नी अपि कष्टभागिनी भवितव्या, पतौ सुखं गते पत्नी अपि सुखभागिनी इत्यादीनां पतिव्रताधर्माणां परिपालनाय सीता वनं गच्छति। अत एव एतस्यादर्शस्य चित्रणेन पतिव्रतानां नारीणां सीताया अग्रस्थानं वर्णितमस्ति। तस्याश्चरित्रं नैर्माल्येन विपुलीकृतमस्ति। तत्र सीताया वनवासनिषेधप्रसङ्गे लक्ष्मणेन रामं प्रति सीतया अपि वनवासो गन्तव्य इति समर्थितमस्ति। यथा-

*अनुचरति शशाङ्कं राहुदोषेऽपि तारा*
*पतति च वनवृक्षे याति भूमिं लता च।*
*त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं*
*व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः(प्रतिमानाटक १/२५)।।*

रामस्य राज्यविप्रलम्भे लक्ष्मणो युवतिरहितं लोकं कर्तुं तत्परो भवति, तत्र सीता लक्ष्मणस्य क्रोधमनुचितं मन्यते। दशरथस्य वचनपालनमेव समेषां धर्मस्तथा कैकेय्या मातुः वरप्रदानं तथा सन्तोषणमेव समेषां धर्म इति सा जानाति। तत्र स्वस्य कोमलहृदयस्य परिचयं ददती सा कैकेय्यै किमप्यशुभं न वक्ति। वल्कलवस्त्रधारणेऽपि सा प्रसन्ना सती पत्या साकं वनवासाय गच्छति। तथैवापरप्रसङ्गे रावणेन स्वहरणप्रयत्ने सती स्वरक्षायै सर्वं प्रयत्नं करोति। रावणाय शपति। स्वस्य चरित्रस्य कोमलता, सरलता, सुशीलता च सर्वत्र गोचरीभवति।

सीता स्वस्य पत्युरनन्यसेविकास्ति। रामेण सह वने निवसने अहोभाग्यं प्रकटयति। श्वश्रूश्वरादीनामपि अपारश्रद्धां प्रकटयति। कठोरपरिस्थितावपि सा सती साध्वी सती पत्युः सहधर्मिणी अस्ति। कुटीनिर्माणं करोति, तस्याः समुचितरूपेण सम्मार्जनं कृत्वा भगवत्पूजायै पुष्पावचयं करोति। आश्रमस्य सज्जायां ध्यानं ददाति। सीतायास्त्यागस्य संयमस्य प्रदर्शनं निम्नाङ्कितवचनेन दर्शनीयमस्ति। यथा-

*आर्ये उपहारसुमन आकीर्णः सम्मार्जित आश्रमः।*
*आश्रमपदविभवेनानुष्ठितो देव समुदाचारः।*
*तद् यावदार्युत्रो नागच्छति, तावदिमान् बालवृक्षानुदकप्रदानेनानुक्रोशयिष्यामि*(भासः, सन् १९६०, पृ. १४०)।।

वृक्षाणां जलदानप्रसङ्गे सीतायाः कठोरश्रमं रामः प्रशंसयति। दर्पणस्योत्थापनेऽपि श्रान्तः सीताया करः कुम्भोत्थापनेऽपि न श्रान्त इति कृत्वा कठोरश्रमलग्ना सीता इति सीतां प्रशंसयति। वनस्य लतया स्त्रीणां सुकुमारतापि कठोरतारूपे परिणमयति, इति रामः सीताया कोमलतामिश्रितां कठोरतां वर्णयति। यथा- *योऽस्याः करः०(प्रतिमानाटक ५/३)।।*

यदा रामः स्वपितुर्दशरथस्य वार्षिकश्राद्धं स्वस्य वैभवानुरुपं कर्तुं वाञ्छति, परन्तु सीता तं सान्त्वयती वैभवानुरूपं श्राद्धन्तु भरतः करोति, वयन्तु वनवासिनः कन्दमूलादिभिः पुष्पैश्च श्राद्धं करोतु इति कथयति। यथा-

"आर्यपुत्र निर्वर्तयिष्यति श्राद्धं भरतः श्रद्धया, अवस्थानुरूपफलोदकेन ह्यार्यपुत्रः। एतत्तातस्य बहुमततरं भविष्यति"(भासः, सन् १९६०, पृ. १४४)।

सीताया उपर्युक्तवचनेन तस्या बुद्धिमत्ता प्रकटीभवति। एवम्प्रकारेण समयोचितं परामर्शं दत्त्वा कुशलगृहिणीत्वेन वर्णिता अस्ति। गृहिण्युचिता सर्वे गुणास्तस्यां सन्ति। पत्ये उचितपरामर्शप्रदानं तस्य कष्टे सहभागिता, तस्य सेवायै निरन्तरं परिचलनं स्वाश्रमस्य सज्जायै ध्यानदानमित्यादयः गृहिण्युचिता गुणास्तस्यां दृश्यन्ते।

महाकविना भासेन सीतायाश्चारित्रिकोत्कर्षस्य सर्वतोभावेन विकासः कृतोऽस्ति। प्रतिमानाटकस्य सीता रामायणस्य सीताया अपि सौम्या मृदुभाषिणी अस्ति। रामायणस्य सीता तु महाराजस्य दशरथस्याज्ञया रामस्य वनवासे लब्धे किञ्चिद्विमना सती रामं प्रति दुर्मनस्का किञ्चिद्दुर्वचनं वदति, रामश्च वश्य एव भवेदिति तस्या आशयः। यथा- *सान्त्व्यमाना०, सा०, स्वयं तु०, यस्य०(वा.रा. २/३०/१-३, ८, ९)।।*

परन्तु प्रतिमानाटकस्य सीता रामस्य राज्याभिषेके न प्रसन्नास्ति, न च वनवासे खिन्नास्ति। रामं प्रति इदमेव वचनं वदति। यथा- "प्रियं मे महाराज एव महाराजः, आर्यपुत्र एव आर्यपुत्रः"। सीतायै महाराजस्य दशरथस्य वनवासो न रोचते। रामस्य महाराजत्वापेक्षया राजकुमारत्वमेव तस्याभिलाषः। एवम्प्रकारेण रामायणस्य सीताया अपि प्रतिमानाटकस्य सीता सम्यग्रूपेण चित्रिता दृश्यते। तस्याः सुगुणता सर्वत्र नाटके दृश्यते। सा च दयायाः प्रतिमूर्तिरिव स्थितास्ति। भरतस्य चित्रवट्यां रामेण सह मेलनायागमने दययार्द्राश्रुनयना सती द्वारि स्वागतं व्याहरति। तस्मिन्नवसरे स्वपत्यू रामस्याज्ञां सत्वरमेव पालयति। यथा- *इयं स्वयं० (प्रतिमानाटक ४/१३)।।*

एतेन भरतं प्रति कोऽपि रोषो नास्तीति सिध्यति। भरतं पुत्रवत् स्निह्यति। मातृवात्सल्यं प्रचुरतया दृश्यते।

अपरत्र प्रसङ्गे रामायणे सीता मायामृगस्याखेटाय रामस्यानुसरणमकुर्वते लक्ष्मणाय कुध्यती सती अप्रियवचनानि कथयति। यथा-

*तमुवाच०, यस्त्वमस्यामवस्थायां०, लोभात्तु०(वाल्मीकिरामायण ३/४५/५-७)।।*

अत्र रामे राक्षसैर्मृत्युं गते मां सीतां लक्ष्मणः पत्नीत्वेनापहरति, अतो रामत्राणाय न गच्छसि, मत्कृते तव मनसि लोभोस्तीत्यादिभावनां सीता प्रकटयति। स्त्रीस्वभावादत्र सीताया मनसि तादृशो विचार आगच्छति। तच्छ्रुत्वा लक्ष्मणः विमना भूत्वा लक्ष्मणरेखां कृत्वा राममन्वेष्टुं गच्छति। वाल्मीकीयरामायणस्य सीतायाश्चरित्रचित्रणे तादृशी सुकुमारता न दर्शिता यथा प्रतिमानाटकस्य सीतायाश्चरित्रचित्रणे दर्शिता। प्रतिमानाटके तु रामस्य मृगाखेटप्रसङ्गे लक्ष्मणस्याश्रमेऽनुपस्थिततां निर्दिश्य तादृशसंवादस्यावसरोऽपि न प्रदत्तः। कस्यचिद्महर्षेः स्वागताय लक्ष्मणः गतोऽस्ति। एवं प्रतिमानाटके सीताया उदात्तचरित्रस्य प्रोज्वलत्वेन प्रदर्शनं विहितमस्ति। भरतश्च सीतामभिवादयन् जनकस्य तपसः फलं स्त्रीमयं तेज इति ब्रवीति। यथा-

*इदं तत् स्त्रीमयं तेजो जातं क्षेत्रोदराद्धलात्।*
*जनकस्य नृपेन्द्रस्य तपसः सन्निदर्शनम् (प्रतिमानाटक ४/१४)।।*

प्रतिमानाटके वर्णितं रामसीतयोर्दाम्पत्यजीवनमादिकाव्यादपि मधुरतरं प्रतीतमस्ति। सीताया महत्ताया प्रशंसामरुन्धत्या समं रामस्य महान् शत्रू रावणोऽपि कथयति। यथा-*इयमेका०(प्रतिमानाटक ५/८)।* अरुन्धतीतुल्या सीतास्ति, तस्याः प्रभावेण पतित्वेन भवानपि पूज्य इति कथनमस्ति। सीतायाः प्रभावेणैव रामस्य पूज्यता अधिगतास्ति।

एवम्प्रकारेण प्रतिमानाटकस्य प्रमुखाया नायिकायाः सीतायाश्चरित्रचित्रणमुपर्युक्तप्रकारैः कृतमस्ति। स्त्रीषु सर्वोत्तमा पतिव्रता नारी, सुन्दरी गृहिणी, स्नेहमयी माता, सरला, सुस्वभावा, उदात्तचरित्रा चेतिरूपेण सीतायाश्चरित्रं प्रदर्शितमस्ति। सीतां विना नाटकस्य कथावस्तु घटना च पूर्णतां न गच्छतीति प्रमुखं पात्रं सीतास्ति। आदरणीया नारी, अनुकरणीया पतिव्रता नारी इत्यादिरूपेण सीता सर्वतोभावेन चित्रितास्ति।

## लक्ष्मणस्य गुणविश्लेषणम्

प्रतिमानाटकस्य पात्राणां मध्ये लक्ष्मणस्य चरित्रचित्रणमपि भासेन सम्यक्प्रदर्शितमस्ति। आज्ञाकारी भ्राता तथा विनीतः लक्ष्मणः सजीवतायाः प्रतिमूर्तिरस्ति। तस्मिन् जीवनमस्ति, उत्साहोस्ति, कष्टसहिष्णुता, भ्रातृप्रेम, वीरता, धीरता तथा विश्वकम्पनः क्रोधोस्ति। स सोढुं न शक्नोति यदन्यायपूर्वकं रामस्याधिकारस्यापहरणं कृत्वा दशरथः कैकेय्या वशीभूतः सन् राज्यं भरताय दद्यात्। कैकेय्या अपराधस्य कृते स्त्रीमात्रस्यास्तित्त्वसमापनाय उद्यतो भवति। अतिशयभ्रातृप्रेम्णा स्वप्रियस्य रामस्य राज्याभिषेके विनष्टे अन्यायं प्रतिकारं कर्तुं धनुषो धारणाय रामस्याज्ञां

प्रतियच्छति। यथा- *यदि न सहसे राज्ञो०(प्रतिमानाटक१/१८ )।* क्रोधस्योग्रतायामपि रामस्य वचनं सर्वथा परिपालयति। रामस्य कोमलवचनेन सम्यग्मार्गे स आगच्छति। भ्रातृभक्तिः प्रचुरतयास्तीति क्रोधः शाम्यति। रामस्य वनवासस्य निश्चये जाते लक्ष्मणोऽपि वनवासाय कटिबद्धो भवति। स्वस्य भ्रातू रामस्य सुखे दुःखे च सहभागी भूत्वा वनाय गन्तुं वाञ्छति। राममनुरुणद्धि। यथा- *निर्योगाद्०(प्रतिमानाटक१/२६ )।* सर्वं वस्तु मह्यमर्धं दत्त्वा चीरवास एकाकी एव धारयसि, मह्यमपि देहि, अहमपि वनवासमभिलषामीति राममनुरुणद्धि। भ्रातृप्रेम दृष्ट्वा रामोऽपि आज्ञां ददाति, सीतारामौ लक्ष्मणश्च वनवासाय गच्छन्ति। रामस्य चरणस्य सेवायै सीतायै लक्ष्मण अनुरुणद्धि। सीतारामयोः स्वीकृतिं प्राप्य वनवासं गच्छति। तत्र स्वस्य भ्रातुर्भ्रातृपत्न्याश्च सम्यक्तया सेवां करोति। सीताया हरणप्रसङ्गे लक्ष्मणस्यानुपस्थितिं प्रदर्श्य लक्ष्मणस्य चरित्रं सुन्दररूपेण प्रस्तुतम्।

महाकविना भासेन प्रतिमानाटके नाटकीयघटनाव्यवस्थायाः परिस्थितेश्चापेक्षया चारित्रिकवृत्तान्तस्याधिकं महत्त्वं प्रदत्तमस्ति। लक्ष्मणस्य कठोरस्य कोमलस्य च चरित्रस्य स्वाभाविकरीत्याभिव्यङ्ग्य सांस्कृतिकचेतनाया विकासः कृतोऽस्ति। एतस्य चरित्रे त्यागः, भ्रातृप्रेम, आत्मविश्वासः एवं वीरता इत्यादिगुणानां समन्वितः परिपाकोऽस्ति। लक्ष्मणस्य जीवनं कुत्रापि विच्छृङ्खलितमभूत्वा अत्यन्तमुग्रमस्ति। यदा कदा उग्रता प्रचण्डरूपमपि धारयति। यद्यपि तस्य कर्तव्याचरणे शिष्टसङ्कल्पः, समुचितदृढता, भक्तिपूर्ण शक्तिः इत्यादीनां उग्रप्रदर्शनमस्ति। यदा रामस्य राज्यविनाशे वनवासे च कैकेय्याः षड्यन्त्रं विदितं भवति, तदा क्रोधावेशेन युवतिरहितं लोकं कर्तुमुद्यतो भवति।

एवम्प्रकारेण लक्ष्मणो वीरश्चास्ति परन्तु अमर्यादितोऽस्ति। यतो हि पूज्यजनानामपि आक्रमणाय प्रस्तुतो भवति। भ्रातृप्रेम्णा तादृशं कार्यं कर्तुमुत्प्रेरयति। रामस्य राज्यविभ्रंशस्य अत्यधिका पीडा तस्मै बाधते। सीतायाः कथनेऽपि लक्ष्मणः क्षमां कर्तुं न शक्यते, धनुर्धारणं कर्तव्यमिति वदति। यथा- *क्रमप्राप्ते हृते०(प्रतिमानाटक १/१९)।।*

तस्योत्तरे अयोध्याया कलुषितराजनीतेर्क्षुभितं लक्ष्मणं भरतं प्रति दयां कृत्वा राज्यपालनाय धनुर्धर इति लक्ष्मणं कथयति। यतो हि भरतो वा राम द्वयमपि भ्राता एवास्तीति राज्ञः पालनं सर्वेषां कर्तव्यमिति निर्दिशति। यथा- *भरतो वा भवेद्राजा०(प्रतिमानाटक १/२०)।।*

वीरवरे लक्ष्मणे अयोध्यायां राजप्रासादस्य षड्यन्त्रस्य प्रतिकारशक्तिरस्ति। तादृशक्रोधाग्नौ सर्वमपि लोकं दग्धुं शक्नोति। लक्ष्मणस्य क्रोधे रामोऽपि भयसंविग्नो भवति। अतः कोमलवचनैः सान्त्वयति। यथा राममुखेण प्रतिमानाटके- *त्रैलोक्यं० (प्रतिमानाटक १/२१)।।*

लक्ष्मणस्य त्याग उदारात्मकः क्षणिकान्तर्वृत्तेरुन्मेषो नास्ति, अपितु सुविचारितस्य दृढनिर्णयस्यस्य परिणामोऽस्ति। स स्वस्य नवोढाया सर्वगुणसम्पन्नाया उर्मिलाया अपि उपेक्षां कृत्वा भ्रातृप्रेम्णि अनुरक्तो भवति। स धीरोऽस्ति परन्तु यदा कदा मर्यादाया पारमपि गच्छति। भ्रातृप्रेम्णैव तादृशक्रोध आगतोऽस्ति। यथा- *अक्षोभ्यः०(प्रतिमानाटक १/१७)।।*

लक्ष्मणस्य राज्यलिप्सा नास्ति, परन्तु अन्याय्यं स सोढुं न शक्नोति, उचितसमये स क्रोधं करोति। रामस्य राज्यविप्रलम्भे तादृशो दुःखी न भवति यादृशः वनवासे भवति। यथा- *यत्कृते०(प्रतिमानाटक १/२३)।।*

एवम्प्रकारेण लक्ष्मणस्य चरित्रमत्यन्तं निर्मलं महनीयमस्ति। प्रेम्णा प्रार्थनया च यौवनस्य कर्तव्यस्य बलिवेद्यां समर्पको लक्ष्मणः पूज्यस्याग्रजस्य रामस्य आदर्शभ्राता एवं परमभक्तश्चास्ति। राममनुगतं लक्ष्मणं प्रशंसयन् दशरथः कथयति। यथा-*तवैव०(प्रतिमानाटक २/१०)।।*

इत्थं लक्ष्मणस्य चित्रणं भासस्य प्रतिमानाटके विहितमस्ति। भ्रातृप्रेम्णः प्रतिमूर्तिः, आज्ञाकारी, स्वयौवनस्य कर्तव्यपालने समर्पकः नाटकस्य उपनायकः लक्ष्मणः वीरशिरोमणिरप्यस्ति। क्रोधस्याधिक्येऽपि अन्याय्यं प्रति तस्य कोपः स्वाभाविको दृश्यते। केवलं कैकेय्याः कारणेन युवतिरहितं लोकं कर्तुन्तु न समीचीनम्। कदाचित् मर्यादाया पारं गच्छति चेत्तत्र धृष्ट इति दृश्यते परन्तु भ्रातृप्रेम्णा तदवगुणो लुप्यते। क्रोधस्यावेशेन किमप्यनुचितं कार्यं कृतं नास्तीति लक्ष्मणस्य चरित्रचित्रणं सम्यगेवास्तीति विभावनीयम्। यत्र यत्र अमर्यादितो भवति तत्र रामो मधुरवाण्या लक्ष्मणं शान्तयति। रामस्य चरितोद्रेकाय लक्ष्मणो माध्यमोऽस्तीति रामस्य सहयोगिरूपेणापि चित्रणं विहितमस्ति।

**भरतचरित्रम्**

प्रतिमानाटके भरतस्य चरित्रमपि रामस्य चरित्रवत् उदात्तरूपेण प्रदर्शितमस्ति। अस्मिन् चरित्रे कुत्रापि कालिम्नो लेशो नास्ति। आदर्शो भ्राता, आदर्शः पुत्र इति रूपेण भरतश्चित्रितः। स्वस्य मातामहं द्रष्टुं मातुलगृहे यदा भरतः गच्छति तदा रामस्य वनवासो दशरथस्य मरणमपि भवति। दूतो भरतमानेतुं भरतसमीपं गच्छति तथा औत्सुक्येन भरत अयोध्यां प्रति गच्छति। अयोध्यायाः सीम्नि दशरथस्य प्रतिमादर्शनेन स सर्वमपि वृत्तान्तं जानाति, तज्ज्ञानेन स मूर्च्छितो भवति। तस्मै अयोध्यागमनं न रोचते, व्यर्थम् एव लगति, जलं पातुं निर्जलां नदीमिव अयोध्या पितृभ्रातृरहिता अस्ति। यथा-

*अयोध्यामटवीभूतां पित्रा भ्रात्रा च वर्जिताम्।*
*पिपासार्तोऽनुधावामि क्षीणतोयां नदीमिव (प्रतिमानाटक ३/१०)।।*

भरतस्योपर्युक्तकथनेन तस्य महत्ता प्रकटीभवति। भ्रातरं प्रति अगाधः स्नेहः, पितृभक्तिश्च द्वयमपि प्रदर्शितमस्ति। रामं प्रति अत्यन्तमादभावः तस्यास्ति। स्वस्य मातुः कारणेन भ्रातुः दुःखस्य सहनं तस्य न भवति। अयोध्यां गत्वा यदा स कैकेय्याः कारणेन पितुर्मरणं रामस्य वनवासश्च कष्टद्वयं जानाति तदा स कैकेय्यै कुध्यति। कुनदीत्वेन तस्यास्तुलनां करोति। यथा-

*मम मातुश्च मातुश्च मध्यस्था त्वं न शोभसे।*
*गङ्गायमुनयोर्मध्ये कुनदीव प्रवेशिता (प्रतिमानाटक ३/१६)।।*

एतद्वचनेन खिन्ना कैकेयी भरतं मया किङ्कृतमिति वदति, तदा पुनरपि कोपं प्रदर्शयन् भरतः स्वस्य मातुः कारणेन स्वात्मानमपि धिक्करोति। यथा- *वयमयशसा० (प्रतिमानाटक ३/१७)।।*

भरतस्योपर्युक्तवचनं तस्य चरित्रस्य निर्मलतां सूचयति। स्वस्य कारणेन स्वमातुः कारणेन अग्रजस्य भातृपत्न्याश्च पीडनं तस्य कृते सह्यं न भवति। अत एव भर्तृद्रोहशीला मातापि कुमाता भवतीति सूचयति। यथा-

*लोकेऽपूर्वं स्थापयाम्येष धर्मं भर्तृद्रोहादस्तु माताप्यमाता (प्रतिमानाटक ४/२३)।।*

स्वस्य राज्याभिषेके प्राप्ते तमभिषेकं निषिध्य रामस्य समीपं चित्रकूटे गच्छति। रामं विना अयोध्या तस्मै न रोचते। यत्र रामोऽस्ति तत्रायोध्या यत्र रामो नास्ति तत्रायोध्या न भवतीति भरतस्य विचारः। एतेन भ्रातृप्रेम्णि अत्यधिका आसक्तिरिति विभावयितुं शक्यते। राज्यस्य सुखप्राप्तौ किञ्चिदपि ध्यानं नास्ति। भ्रातृत्वस्य प्रेम्णः मेलनस्यैव तस्य मनसि विचार उत्पद्यते, न तु राज्यसुखभोगस्य। यथा- *तत्र यास्यामि० (प्रतिमानाटक ३/२४)।।*

तत्र गत्वा स्वशिरसि प्राप्तं कलङ्कं दूरीकर्तुं रामाय राज्यं दातुमिच्छति। रामस्य सेवायां वने उषितुमिच्छति। परन्तु रामो मूहुर्तमपि स्थातुं न ददाति, यतो हि प्रजानां रक्षणमेव राज्ञां परमो धर्मः। रामो भरतं सर्वथा निर्दोषं कथयति। रामस्य निर्देशेन अनुरोधद्वयं रामाय निवेद्य राज्यं प्रतिनिवर्तते। प्रथमश्च चतुर्दशवर्षानन्तरं स्वस्य राज्यग्रहणं रामेणावश्यं

कर्तव्यम्, अपरश्च रामस्य पादुकाद्वयं याचित्वा राज्यस्य भारं रामस्य नाम्ना वहामि। इत्थं कृत्वा भरतो अयोध्यां गत्वा योगिसदृशो भूत्वा राज्यं सञ्चालयति। रामस्य सेवां कृत्वैव वने उषितुं वाञ्छति। यथा- इह *स्थास्यामि०(प्रतिमानाटक ४/१९)।।*

भरतस्य स्वल्पापि राज्यप्राप्तौ कामना नास्ति। यदा रामो भरताय राज्यग्रहणं कृत्वा राज्यं कर्तुमाज्ञापयति तथा स अत्यन्तं दुःखितो भवति। मातृदोषेणैव एतादृशोऽनर्थो जात अतो ब्रणे प्रहर्तुमलमिति तस्य विचारः। यथा- *प्रसीदत्वार्यः। आर्य ! अलमिदानीं व्रणे प्रहर्तुम्। अपि सुगुण०(प्रतिमानाटक ४/१२)।।*

भरतस्योपर्युक्तां करुणामयीं वाणीं श्रुत्वा सीतारामौ च विस्मितौ भवतः। सीता भरतस्य करुणतां निर्दिशती कथयति। यथा-

"आर्यपुत्र ! अतिकरुण मन्त्रयते भरतः। किमिदानीमार्यपुत्रेण चिन्त्यते" (प्रतिमानाटक ४/३)।

तथैव रावणेन सीताया अपहरणस्य समाचारं श्रुत्वा स दुःखितो भूत्वा कैकेय्यै दोषं ददाति। अनन्तरं कैकेयी अन्धमुनेः शापं निवेद्य रामस्य वनवासस्तथा दशरथस्य मृत्युं तेनैव कारणेन जात इति वदति। स्वस्य निर्दोषतां कथयति। शापेन कैकेय्या निमित्तमात्रं ज्ञात्वा भरतः कैकेय्या क्षमादानं याचते। अत्यधिकं पश्चात्तापं करोति। यथा-

*हन्त ! त्रैलोक्यसाक्षिणः खल्वेते।*

*दिष्ट्यानपराद्धात्रभवती। अम्ब ! यद् भ्रातृस्नेहात्समुत्पन्नमन्युना मया दूषितात्रभवती, तत् सर्वं मर्षयितव्यम्। अम्ब अभिवादये* (भासः, सन् १९६०, पृ. १८३)।।

कैकेयी च भरतं निर्दोषं कथयति तथा तस्मै क्षमादानं कुर्वती वदति। यथा-

*तात का नाम माता पुत्रकृत्यापराधं न मर्षयति ? उत्तिष्ठोत्तिष्ठ कोऽत्र दोषः* (भासः, सन् १९६०, पृ. १८३)।।

इत्थं प्रकारेण भरतस्य चरित्रमुत्तरोत्तरेण प्रोज्वलितं वर्तते। रामः स्वयं भरतस्य चरित्रं प्रशंसयन् कथयति। यथा- *यत्सत्यं०(प्रतिमानाटक ४/२३)।।*

भरतस्य चरित्रस्य समुज्वलतां दृष्ट्वा तथा राज्यस्य प्राप्तावपि तत्र विरतिं दर्शयित्वा भरतो महद्यशः प्राप्तवान् इति रामः प्रशंसति। यथा-

*सुचिरेणैव कालेन०(प्रतिमानाटक ४/२६)।।*

स्वस्य त्यागादपि भरतस्य महान् त्यागत्रऽस्तीति रामः विश्वसिति। चतुर्दशवर्षाणां वनवासव्यतीते रामस्यायोध्यायामागमने भरतो रामाय राज्यभारं सहर्षं ददाति, राज्यभारवहने स्वस्य सौभाग्यं मनुते। यथा- *अनुगृहीतोऽस्मि। आर्य ! प्रतिगृह्यतां राज्यभारः*(भासः, सन् १९६०, पृ. १९०)।

एवम्प्रकारेण भासेन प्रतिमानाटके सर्वतोऽधिकं समुज्वलं चरित्रं भरतस्य चित्रणं विहितमस्ति। यद्यपि रामस्य चरित्रचित्रणं मर्यादापुरुषोत्तमरूपेण विहितम्, तथापि भरतस्यापि चरित्रं मर्यादायाः पारङ्गतं नास्ति। अतो रामतुल्यमेव भरतस्यापि चरित्रमिति ज्ञातुं शक्यते। प्रतिमानाटकस्य प्रमुखपात्राणां मध्ये भरतस्यापि नामाग्रे आगच्छति। भ्रातृप्रेमी, शान्तः, उदारः, करुणः, विनम्रः, सर्वजनदुःखविज्ञ इत्यादिविभूषणैर्भरतो नाटके चित्रितोऽस्ति।

**दशरथचरित्रम्**

नाटकस्य नायकस्य पिता दशरथः स्नेही पितास्ति। सन्ततिमोह एव तस्य जीवनस्य महद्वस्तु अस्ति। यथा जलं विना मत्स्यो जीवितुं न शक्नोति तद्वद्रामं विना दशरथो जीवितुं न शक्नोति। स प्रतिजानीते यत् कौशल्यासुमित्रे च

त्यक्तुं शक्नोमि, लक्ष्मीञ्च परित्यक्तुं शक्नोमि परन्तु प्राणवल्लभं पितृभक्तं रामं त्यक्तुं न शक्नोमि। अत एव सर्वदा रामस्य दर्शनेनैव तस्य प्राणास्तिष्ठन्ति। क्षणमात्रमपि रामस्यादर्शने स मूर्च्छितो भूमौ निपतति। रामस्य वनवासगमनात् स पुत्रशोकेन मृत्युं प्राप्तः। रामस्य प्रति विशेषतो तस्य महती प्रीतिरासीत्। यथा च वाल्मीकीयरामायणे दशरथस्य वचनम्- *कौशल्यां०, परा०(वाल्मीकिरामायण २/१२/१२-१३)।।*

अस्यैव वचनस्य पुष्टिरपि प्रतिमानाटके दृश्यते। इतोऽपि परं कारुणिकरूपेण दशरथस्य चरित्रं चित्रितं वर्तते। स रामाय वनवासस्याज्ञां दातुमपि न शक्नोति। पितृभक्तो रामः कैकेय्यै प्रियं कर्तुं पितृवचनस्य मानं स्थापयितुं स्वयमेव वनं गच्छति। अत एव सलक्ष्मणं ससीतं रामस्य वनगमनं श्रुत्वा दशरथः मुहुर्मुहुर्मूर्च्छितो भवति। वनं गन्तुं दशरथस्याज्ञामादातुं राम आगच्छन्नस्तीति कञ्चुकीयस्य वचनं श्रुत्वा दशरथः शिथिलो भूत्वा भूमौ पतति। यथा- *श्रुत्वा ते वनगमनं वधूसहायं०(प्रतिमानाटक १/३०)।।*

रामस्य वनवासो जातः। पुत्रवियोगेन महाराजस्य दशरथस्य प्राणाः जलहीना मत्स्या इव चञ्चलतामादधते। पुत्रवियोगः साक्षात् मृत्युर्भूत्वा तस्य समीपे आगच्छन्नस्ति। स्वस्य दुःखकष्टैः पीडितो भूत्वा महीतले निरन्तरं पतन्नस्ति। तस्य दयनीयावस्थां सूचयन् कञ्चुकी दशरथस्य उन्मत्तावस्थायामिव विरहशोकाग्निना दग्धहृदयतां शोकसागरे निलीनताञ्च वर्णयति। यथा- *मेरुश्चलन्निव०(प्रतिमानाटक २/१)।।*

पुनश्च दशरथः स्वस्य पुत्रस्य रामस्य दर्शनस्य लालसायां इतस्तत उत्थाय पतति, हाहाकारं कृत्वा रामस्यागमनस्य दिशं पश्यति। तामेव शिथिलावस्थां कञ्चुकी कथयति। यथा- *पतत्युत्थाय०(प्रतिमानाटक २/३)।।*

तथैव राजा दशरथः करुणं विलापं कृत्वा सर्वे मां त्यक्त्वा वनं गताः। किमर्थं मां दुःखसागरे निमज्य गताः, हा कष्टमनुभूयते इति उच्चैर्लपति। वनवासश्च केवलं रामायैवास्ति परन्तु रामेण साकं लक्ष्मणेन सीतया च दशरथस्य समीपवसनं त्यक्तमिति महत्कष्टमस्ति। लक्ष्मणेन भ्रातृस्नेहस्य कारणेन पितृस्नेहाय तिलाञ्जलिः प्रदत्तः। तथैव सीतयापि पातिव्रत्यमनुचरन्त्या वनं गतमस्ति। एतत्सर्वं द्रष्टुमशक्तो राजा वारम्वारं क्रोशति, स्वात्मानं धिक् करोति। यथा- *हा वत्स०(प्रतिमानाटक २/४)।।*

रामेण लक्ष्मणेन च वर्जितः, इतोऽपि वैदेह्या स्ववध्वापि वर्जितो दशरथः स्वं धिक्कृत्य अयशोभाजनो जात इति दुःखं प्रकटयति। सीतयापि परित्यजनेन तस्य मनसि महद्दुःखमस्तीत्यनुभूयते। यथा- *रामेणापि०(प्रतिमानाटक २/५)।।*

पुत्रवियोगे तस्य मन आकुलं वर्तते, मस्तिष्कञ्च रामविरहेण विक्षिप्तं तथा कैकेय्या षड्यन्त्रेण समस्तं कार्यजातमभूदिति स्मारं स्मारं भूमौ वाणविद्ध मृग इव विचरन्नस्ति। पारिवारिकः स्नेहो विच्छिन्नो वर्तते। मेधा च विकुण्ठितास्ति। पूर्वं प्राणाधिकप्रिया पत्नी कैकेयी च व्याघ्रीवत् तेनानुभूता। अत एव स्वकीयं भाग्यमपि शपति। अनपत्यमेव वरमथवा रामोऽन्यस्य राज्ञः पुत्रो भवेद् अथवा च कैकेयी वने व्याघ्री जाता चेदपि महती विपत्तिर्न भवति। यथा- *अनपत्या०(प्रतिमानाटक २/८)।।*

कौशल्या स्वात्मानं दोषभाजं स्वीकरोति, परन्तु दशरथो रामस्य प्रसवेन कौशल्या भाग्यवती असि इति वदति। भाग्यहीनस्तु अहं दशरथ इति दैवमपि क्रोशति। यथा- *अहं हि०(प्रतिमानाटक २/९)।।*

सुमन्त्रस्थ रथं रामविहीनमागतं दृष्ट्वा दशरथस्य दुःखमितोऽपि वर्धते। रामस्य लक्ष्मणस्य सीतायाश्चागमनस्याशां गृहीत्वा दशरथो येन केन प्रकारेण प्राणान् धारयन्नस्ति। परन्तु सुमन्त्रस्य शून्यं रथं दृष्ट्वा

जीविताशापि शून्या एव जातास्ति। साक्षात् कालो ग्रहणाय रथं प्रेषितवान् इति वत् शून्यं रथं दृष्ट्वा दशरथस्य प्राणा गच्छन्ति। यथा- *शून्यः प्राप्तो०(प्रतिमानाटक २/११)।।*

रामं प्रति सततं मनो गच्छति, काल्पनिकसंसारे दशरथो जीवितोऽस्ति। स नेत्राभ्यामपि न पश्यति, रामस्य सकृत् स्पर्शमात्रेण जीवितुं शक्नोति, अन्यथा प्राणान् त्यजति, इति स्वयमेव वदति। यथा- *सकृत् स्पृशामि०(प्रतिमानाटक.२/१६)।।, अङ्गं मे स्पृश०(प्रतिमानाटक२/१८)।।*

सततं राममनस्को राजा दशरथो रामं महाराजं कारयितुं सफलो न भवति। रामं महाराजं कारयित्वा वने उषित्वा तपसा भगवन्तमाराध्य प्राणोत्सर्जनस्य महती इच्छा दशरथस्यास्ति। परन्तु कैकेय्याः कारणेन तत्सर्वमन्यथा कृतं केवलमेकक्षणे इति सर्वे मनोरथा खण्डिताः सन्ति। अतो भग्नाशां दृष्ट्वा प्राणान् त्यजति। तस्य पुत्रस्नेहोऽनुपमोऽस्ति। यथा- *राम, वैदेहि, लक्ष्मण अहमितः पितॄणां सकाशं गच्छामि* (भासः, सन् १९६०, पृ. ८२)।

एवम्प्रकारेण महाकविना भासेन दशरथस्य चरित्रचित्रणे पुत्रवत्सलत्वेन दशरथो निरूपितः। पुत्रस्य स्मरणेनैव प्राणांस्त्यजति। रामस्योपरि महती श्रद्धास्ति। पुत्रेऽविच्छिन्नं प्रेम तेन प्रदर्शितमस्ति। पुत्रपित्रोरनुपमः सम्बन्धश्च प्रदर्शितः। मर्यादायाः पाठोऽभिव्यक्तः। अतो दशरथस्य चरित्रचित्रणमपि उपर्युक्तप्रकारेण सम्यक् प्रदर्शितमस्ति।

### कौशल्याया गुणचित्रणम्

महाराज्ञी कौशल्या दशरथस्य विश्वस्ता पत्नी अस्ति। उदारहृदया माताऽप्यस्ति। स्वस्य पत्युर्दशरथस्य अपारसेवां करोति, सर्वान् पुत्रान् रामवदाचरति। त्यागतपोऽनुरागाणां प्रतिमूर्तिरिवास्ति। रामायणे वर्णितया कौशल्यया भिन्ना प्रतिमानाटके वर्णिता कौशल्या, तस्या सुन्दरमाचरणं प्रतिमानाटके दृश्यते। रामायणे तु कैकेय्या व्यवहारेण क्षुब्धा कौशल्या भरतमपि किमप्यवाच्यं श्रावयति। परन्तु प्रतिमानाटके कौशल्या कैकेयीं प्रति किमपि रोषं न प्रकटयति। कैकेय्या निर्दोषतां वर्णयति। भरतमपि कैकेय्यै प्रणामाय अनुरुणद्धि। तस्या मनसि निर्मलो भावो वर्तते। रामायणे तु अपरमेवास्ति- *तथैव०, आगतः० (वाल्मीकिरामायण२/७५/५-६), इदं ते०, प्रस्थाप्य०(वाल्मीकिरामायण२/७५/११-१२)॥*

उपर्युक्तेषु पद्येषु भरतस्य राजपदप्राप्तौ लिप्सा दर्शिता। तेनैव कारणेन रामस्य वनवासः कैकेय्या माध्यमेन इति सूचितम्। कौशल्यावचनमपि भरताय किञ्चिद्दोषाविष्करणमस्ति। परन्तु प्रतिमानाटके कौशल्या भरतं कैकेयीञ्च दोषं न ददाति। उदारहृदया सा इति ज्ञायते। मातुलगृहात्प्राप्तं भरतं दृष्ट्वैव अमोघाशीर्भिः सिञ्चति। यथा- "जात। निःसन्तापो भव" ((भासः, सन् १९६०, पृ. १००)। इतोपि विशिष्य कैकेयीं निरपराधिनीं कृत्वा भरताय कैकेय्या अभिवादनाय कर्तव्यस्योपदेशं करोति। यथा-

*कौशल्या- जात सर्वसमुदाचारमध्यस्थः किं न वन्दसे मातरम् ?*

*भरतः- मातरमिति। अम्ब त्वमेव मे माता। अम्ब अभिवादये* (भासः, सन् १९६०, पृ. १०६)।

यद्यपि कौशल्या रामस्य माता परन्तु भरतादयोऽपि स्वस्य मातुरधिकं सम्मन्यन्ते। परन्तु कौशल्या भरताय कैकेय्या अपि सम्मानकरणाय निर्दिशति। इत्थं विशालहृदया नारी पतिव्रता च कौशल्या। प्रियस्य दशरथस्य सेवायां निरन्तरं सज्जमाना दृश्यते। अन्तकालेऽपि दशरथः कौशल्याः प्रेमस्पर्शं वाञ्छति। रामस्य त्यागे सति दशरथ एकाकी एव तिष्ठति, तस्मिन् समये दशरथः कौशल्यामेव सर्वं दुःखं प्रकटयति। एतेन कौशल्या विश्वस्ता उदारहृदया आदर्शपुत्रस्य रामस्य माता इति सिध्यति। महाराजं दशरथं वारम्वारं दुःखापनोदं कर्तुं प्रयत्नशीला वर्तते। यथा-

*अलमिदानीं०*(भासः, सन् १९६०, पृ. ९७)।।

स्वप्रियपुत्रस्य रामस्य वनवासदर्शनात्तथा राज्याभिषेके जायमाने निरोधत्वाज्जनन्याः कौशल्या मनसि महद् दुःखं भवेत्परन्तु कस्मै वदेत्। प्रियं पतिं महाराजं वक्तुं न शक्नोति, यतो हि दशरथस्य दशा इतोपि दुःसहास्ति। अतः किङ्कर्तव्यविमूढा भवति। महाराजं दशरथमपि सा आश्वासनाय रता भवति। स्वमनसि महद्दुःखं वर्तते परन्तु स्वदुःखं विस्मृत्य महाराजस्य दुःखविनोदाय प्रयतमाना अस्ति। इत्थमेव वक्तुं सक्षमा अस्ति- महाराज समाश्वसिहि समाश्वसिहि (भासः, सन् १९६०, पृ. ७४)।

रामस्य जननी कौशला सेवा, त्यागः, ममता, करुणा, क्षमा इत्यादिप्रभृतीनामुदात्तवृत्तीनां प्रतीकमस्ति। एतादृश्या नार्या अस्मिन्नाटके अल्पस्थान एव उपस्थितं कृतं परन्तु मौन एव मुखरता, अल्पतायामेव विशदतास्ति। भासस्य नारीपात्रे पारिवारिक-सामाजिक-सांस्कृतिकपक्षेषु सम्पूर्णजीवनस्य प्रतिफलितकरणेऽपूर्वा क्षमतास्ति। अत एव महाराजो दशरथो मरणासन्न सन्नपि अस्याः शरीरस्य स्पर्शाय व्याकुलो भवति। यथा- *अङ्गं मे स्पृश०(प्रतिमानाटक २/१८)।।*

अत एव कौशल्यायाश्चरित्रचित्रणं सुन्दरतया कृतमस्ति। सर्वत्र नाटके कौशल्यायाश्चरित्रचित्रणे एकैकमक्षरं तस्याः स्वभावेनानुप्राणितमस्ति। यथा महाराजस्य दशरथस्य कौशल्यां प्रति हार्दिकताभिव्यक्ता- कौशल्ये सारवती खल्वसि। त्वया हि खलु रामो गर्भे धृतः (प्रतिमानाटक २/१८)।।

एवम्प्रकारेण भासेन उदारमनस्त्वेन पातिव्रत्यधर्मरता, मातृवात्सल्ययुक्ता, कुलोचितमर्यादारता, विषमपरिस्थितावपि धैर्यसंयुता, सर्वेषां जनानां शुभाशययुता कौशल्या इति प्रतिमानाटके कौशल्यायायाश्चरित्रचित्रणं विहितमस्ति। स्वल्पस्थानेषु स्वल्पसंवादेषु कौशल्याया वर्णनमागतेऽपि स्वल्पेऽपि बृहत्तता, मौनेऽपि मुखरता चास्याश्चरित्रे दृश्यते इति महत्त्वपूर्णो विषयः।

**कैकेयीचरित्रचित्रणम्**

कैकेयी भरतस्य मातास्ति। सा प्रतिमानाटकस्य प्रमुखपात्राणां मध्ये एकास्ति। नाटकस्य कथावस्तुनो विस्तारश्च कैकेय्याश्चरित्रादेवास्ति। तस्या एव वचनाद्रामस्य वनवासः, दशरथस्य मृत्युरित्याद्याः समस्ता घटना जाताः सन्ति। नाटके खलपात्रत्वेन पूर्वं कैकेयी दृश्यते। तस्यास्तादृशं विप्रियवचनादेव सर्वेषां कटुवचनानां श्राविका जातास्ति। स्वस्याः पुत्रो भरतोऽपि नाद्रियते। यस्य कृते राज्यं ययाच स एव धिक् करोति। अत्यधिकं धिक्कारं सोढुमसमर्था सती कैकेयी भरतं सर्वमृषिशापाज्जातमिति बोधयति। निर्दुष्टां कैकेयीं ज्ञात्वा भरतः क्षमां याचते।

इत्थं कैकेयी निर्दुष्टा किन्तु प्रारम्भे खलपात्ररूपेण चित्रिता प्राप्यते, पश्चात्कारणविज्ञाने ऋषिशापादेव विप्रियं वाक्यमुक्तवतीति विभाव्यते। भवितव्यवशाद् दुःखदं कार्यं कर्तुमुत्साहिता सती अवमानतां तिरस्कारञ्च फलरूपेण प्राप्तवती। प्रतिमानाटके कैकेयी निर्दुष्टा अस्ति। स्वयं राममुखेन तस्याश्चरित्रञ्च कथितम्। यथा- *यस्याः शक्रसमो०*(प्रतिमानाटक १/१३)*।।*

रामायणे तु कैकेयी दुष्टा, अनर्थानां जडरूपेण कथितास्ति। भरतः स्वयमेव कैकेयीं धिक्कृत्य कथयति। यथा- *कुलस्य त्वमभावाय०, मृत्युमापादितो० (वाल्मीकिरामायण २/७३/४-५)।।*

अत एव रामायणे कैकेय्याश्चरित्रचित्रणे विपत्तीनां जडरूपेण चित्रितमस्ति। महात्मा भरतोऽपि तादृशं विप्रियं वचनं वक्ति, परन्तु प्रतिमानाटके तु किमर्थं रामाय वनवासं प्रेषितवती ? त्वं मम माता न, अपितु कुनदीव असि इत्येवमात्रमुक्तमस्ति। कैकेय्याः शापस्य कारणमृषिशापमस्ति इति ज्ञानेन भरतः क्षमाशीलो भवति। एवम्प्रकारेण महाराज्ञ्याः कैकेय्या भावनानां विविधतया गम्भीरतया गूढतया च चरित्रस्य दृढं प्रकटीकरणमन्येषु रामकाव्येषु

नोपलभ्यते। प्रतिमानाटक एव कैकेय्याः स्वतन्त्रं व्यक्तित्वं, सजीवता एवं चरित्रस्य स्वाभाविकता चौतप्रोतास्ति। भासेन कैकेय्याश्चरित्रस्य विभिन्नावसरे सामाजिकादर्शे घटना गुम्फितास्ति। समस्यानां समाधानमपि तथा कृतमस्ति। अतः करुणरसेनौतप्रोतं चरित्रमस्ति।

परन्तु रामायणस्य कैकेय्याश्चरित्रं दयनीयमस्ति। सर्वस्य पापस्य दुर्भगस्य च कारणं कैकेयी इति कथितमस्ति। सर्वे राजसदस्यास्तां धिक्कुर्वन्ति। यथा- *नृशंसे पापसङ्कल्पे०, कैकेयी नरकं गच्छ०(वाल्मीकिरामायण. २/७४/४-५)* इत्यादिभिः।

## निष्कर्षः

एवम्प्रकारेण महाकविना भासेन रामायणस्याश्रयमात्रेण रामायणादपि सुन्दररूपेण पात्राणां चित्रणं विहितमस्ति। यद्यपि अस्मिन् नाटके रावणः, कौशल्या, सुमित्रा इत्यादीनि पात्राणि सन्ति, तेषामपि चरित्रचित्रणं कृतमस्ति, परन्तु प्रमुखाणां पात्राणामेवात्र चरित्रचित्रणं कृतमस्ति। प्रतिमानाटके समाजस्य देशस्य च हिताय आदर्शरूपेण चरित्राणां चित्रणेन स्वधर्मे मर्यादायाञ्च जनानां चलनाय प्रेरणं विहितमस्ति। रामस्य भरतस्य च धीरूभासस्यान्यद्नाटकमिव पात्राणामुपस्थितिर्मौलिकरूपेण आगतास्ति। पारिवारिकैकतां स्थित्वापि पात्राणि स्वभावेन पृथक् प्रतीयन्ते। सर्वे नाटकस्य सदस्या महान्तः सन्तीति तेषां पावनचरित्राणां सम्यग्रूपेण चित्रणं विधाय दिव्यस्वरूपस्य प्रतिमानाटकस्य गौरवपूर्णं रचनं विहितमस्ति।

## सन्दर्भग्रन्थसूची

खण्डेवाल, जयकिशन, (१९६९), *संस्कृत नाट्य सिद्धान्त*, आगरा: विनोद पुस्तक मन्दिर।

दण्डी, (सन् १९६०), *दशकुमारचरितम्*, (राङ्गेय राघव, व्या.), दिल्लीः राजपाल एण्ड सन्ज।

पतञ्जलिः, (२०१९). *व्याकरणमहाभाष्यम्* (द्वितीयः सं, खं. प्रथमः). (वेदव्रत सम्पा.) हरयाणा: हरयाणासंस्कृतसंस्थानम्।

बाणभट्टः, (सन् १९४६), *हर्षचरितम्*, वाराणसीः चौखम्बा विद्याभवन।

भरतमुनिः, (सन् १९५४), *नाट्यशास्त्रम्*, (भोलानाथ शर्मा, व्या.), कानपुरः साहित्य निकेतन।

भासः, (सन् १९६०), *प्रतिमानाटकम्*. (श. ओझा, सं.) जयपुर: आदर्श प्रकाशन।

वाल्मीकिः, (२०७०), *वाल्मीकीयरामायण*, गोरखपुरः गीताप्रेस गोरखपुर।

विश्वनाथः, (सन् १९५७), *साहित्यदर्पणम्*, (सत्यव्रत सिंह, व्या.), वाराणसीः चौखम्बा विद्याभवन।

शास्त्री, न. (२००९), *महाकवि भास* (द्वितीय सं.), भोपाल: मध्यप्रदेश हिन्दीग्रन्थ अकादमी।